THE SANSKRIT FIRST READER

(*For the use of Secondary Schools*)

BY

Pandit T. R. KRISHNACHARYA

Revised and Enlarged.

Approved by the Director of Public Instruction, Madras.

THIRTY-SECOND EDITION 4000 COPIES

कुम्भघोणस्थेन मल्लियं रामाचार्यसूनुना
पण्डित टी. आर्. कृष्णाचार्येण
विरचितः।

॥ संस्कृतप्रथमपाठः ॥

Registered Under Act XXV of 1867.

PRINTED AT THE
HINDI PRACHAR PRESS,
Triplicane, Madras.

Price $4\frac{1}{2}$ As.] 1931 [Post Extra.

॥ श्रीगणेशाय नमः ॥

संस्कृतप्रथमपाठः ॥ १ ॥

स्वराः ।

अ आ इ ई उ ऊ

ऋ ॠ ऌ ॡ ए ऐ

ओ औ अं अः

व्यञ्जनानि ।

क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म

य र ल व

श ष स ह

ळ क्ष ज्ञ

१, २, ३, ४, ५, ६, ७, ८, ९, १०.

स्वरयुक्तव्यञ्जनानि ।

क	का	कि	की	कु	कू	के	कै	को	कौ	कं	कः
ख	खा	खि	खी	खु	खू	खे	खै	खो	खौ	खं	खः
ग	गा	गि	गी	गु	गू	गे	गै	गो	गौ	गं	गः
घ	घा	घि	घी	घु	घू	घे	घै	घो	घौ	घं	घः
ङ	ङा	ङि	ङी	ङु	ङू	ङे	ङै	ङो	ङौ	ङं	ङः
च	चा	चि	ची	चु	चू	चे	चै	चो	चौ	चं	चः

छ	छा	छि	छी	छु	छू	छे	छै	छो	छौ	छं	छः
ज	जा	जि	जी	जु	जू	जे	जै	जो	जौ	जं	जः
झ	झा	झि	झी	झु	झू	झे	झै	झो	झौ	झं	झः
ञ	ञा	ञि	ञी	ञु	ञू	ञे	ञै	ञो	ञौ	ञं	ञः
ट	टा	टि	टी	टु	टू	टे	टै	टो	टौ	टं	टः
ठ	ठा	ठि	ठी	ठु	ठू	ठे	ठै	ठो	ठौ	ठं	ठः

ड	डा	डि	डी	डु	डू	डे	डै	डो	डौ	डं	डः
ढ	ढा	ढि	ढी	ढु	ढू	ढे	ढै	ढो	ढौ	ढं	ढः
ण	णा	णि	णी	णु	णू	णे	णै	णो	णौ	णं	णः
त	ता	ति	ती	तु	तू	ते	तै	तो	तौ	तं	तः
थ	था	थि	थी	थु	थू	थे	थै	थो	थौ	थं	थः
द	दा	दि	दी	दु	दू	दे	दै	दो	दौ	दं	दः

ध	धा	धि	धी	धु	धू	धे	धै	धो	धौ	धं	धः
न	ना	नि	नी	नु	नू	ने	नै	नो	नौ	नं	नः
प	पा	पि	पी	पु	पू	पे	पै	पो	पौ	पं	पः
फ	फा	फि	फी	फु	फू	फे	फै	फो	फौ	फं	फः
ब	बा	बि	बी	बु	बू	बे	बै	बो	बौ	बं	बः
भ	भा	भि	भी	भु	भू	भे	भै	भो	भौ	भं	भः

म	मा	मि	मी	मु	मू	मे	मै	मो	मौ	मं	मः
य	या	यि	यी	यु	यू	ये	यै	यो	यौ	यं	यः
र	रा	रि	री	रु	रू	रे	रै	रो	रौ	रं	रः
ल	ला	लि	ली	लु	लू	ले	लै	लो	लौ	लं	लः
व	वा	वि	वी	वु	वू	वे	वै	वो	वौ	वं	वः
श	शा	शि	शी	शु	शू	शे	शै	शो	शौ	शं	शः

ष	षा	षि	षीं	षु	षू	षे	षै	षो	षौ	षं	षः
स	सा	सि	सी	सु	सू	से	सै	सो	सौ	सं	सः
ह	हा	हि	ही	हु	हू	हे	है	हो	हौ	हं	हः
ळ	ळा	ळि	ळी	ळु	ळू	ळे	ळै	ळो	ळौ	ळं	ळः
क्ष	क्षा	क्षि	क्षी	क्षु	क्षू	क्षे	क्षै	क्षो	क्षौ	क्षं	क्षः
ज्ञ	ज्ञा	ज्ञि	ज्ञी	ज्ञु	ज्ञू	ज्ञे	ज्ञै	ज्ञो	ज्ञौ	ज्ञं	ज्ञः

ऋकारयुक्तव्यञ्जनानि ।

कृ गृ घृ चृ छृ जृ णृ तृ

थृ दृ धृ नृ बृ भृ मृ वृ

शृ—श्‍ृ षृ सृ हृ

ॠकारयुक्तव्यञ्जनानि ।

कॄ गॄ घॄ चॄ तॄ दॄ नॄ मॄ

शॄ षॄ सॄ हॄ

संयुक्तव्यञ्जनानि ।

क्क (क्‌क) क्त (क्‌त) क्न (क्‌न)

क्म (क्‌म) क्य (क्‌य) क्र—क्र (क्‌र)

क्ल (क्‌ल) क्व (क्‌व) क्ष (क्‌ष)

क्स (क्‌स)	ख्य (ख्‌य)	ग्न (ग्‌न)
ग्म (ग्‌म)	ग्य (ग्‌य)	ग्र (ग्‌र)
ग्ल (ग्‌ल)	घ्न (घ्‌न)	घ्य (घ्‌य)
घ्र (घ्‌र)	घ्व (घ्‌व)	ङ्क (ङ्‌क)
ङ्ख (ङ्‌ख)	ङ्ग (ङ्‌ग)	ङ्घ (ङ्‌घ)
च्च (च्‌च)	च्छ (च्‌छ)	च्ञ (च्‌ञ)
च्य (च्‌य)	च्व (च्‌व)	ज्ज (ज्‌ज)
ज्झ (ज्‌झ)	ज्ञ (ज्‌ञ)	ज्य (ज्‌य)
ज्र (ज्‌र)	ज्व (ज्‌व)	ञ्च (ञ्‌च)
ञ्छ (ञ्‌छ)	ञ्ज (ञ्‌ज)	ट्ट (ट्‌ट)
ट्य (ट्‌य)	ट्र (ट्‌र)	ट्व (ट्‌व)
ड्म (ड्‌म)	ड्य (ड्‌य)	ड्व (ड्‌व)
ढ्व (ढ्‌व)	ण्ट (ण्‌ट)	ण्ठ (ण्‌ठ)
ण्ड (ण्‌ड)	ण्ढ (ण्‌ढ)	ण्ण (ण्‌ण)
ण्म (ण्‌म)	ण्य (ण्‌य)	ण्व (ण्‌व)

त्त (त्‌त)	त्थ (त्‌थ)	त्न (त्‌न)
त्प (त्‌प)	त्य (त्‌य)	त्र–त्र (त्‌र)
त्व (त्‌व)	थ्न (थ्‌न)	द्द (द्‌द)
द्ध (द्‌ध)	द्न (द्‌न)	द्ब (द्‌ब)
द्भ (द्‌भ)	द्म (द्‌म)	द्य (द्‌य)
द्र (द्‌र)	द्व (द्‌व)	न्त (न्‌त)
न्थ (न्‌थ)	न्द (न्‌द)	न्ध (न्‌ध)
न्न (न्‌न)	न्य (न्‌य)	न्र (न्‌र)
न्व (न्‌व)	न्ह (न्‌ह)	प्त (प्‌त)
प्न (प्‌न)	प्प (प्‌प)	प्य (प्‌य)
प्र (प्‌र)	प्ल (प्‌ल)	प्व (प्‌व)
प्स (प्‌स)	ब्ज (ब्‌ज)	ब्द (ब्‌द)
ब्ध (ब्‌ध)	ब्न (ब्‌न)	ब्य (ब्‌य)
भ्न (भ्‌न)	भ्य (भ्‌य)	भ्र (भ्‌र)
भ्व (भ्‌व)	म्न (म्‌न)	म्प (म्‌प)
म्म (म्‌म)	म्य (म्‌य)	म्र (म्‌र)

म्ल (म्‌ल)	र्क (र्‌क)	र्ग (र्‌ग)
र्च (र्‌च)	र्ज (र्‌ज)	र्त (र्‌त)
र्थ (र्‌थ)	र्द (र्‌द)	र्ध (र्‌ध)
र्न (र्‌न)	र्ब (र्‌ब)	र्म (र्‌म)
र्य (र्‌य)	र्व (र्‌व)	र्ष (र्‌ष)
र्ह (र्‌ह)	ल्प (ल्‌प)	ल्म (ल्‌म)
ल्य (ल्‌य)	ल्व (ल्‌व)	ल्ह (ल्‌ह)
व्न (व्‌न)	व्य (व्‌य)	व्र (व्‌र)
श्च (श्‌च)	श्न (श्‌न)	श्म (श्‌म)
श्य (श्‌य)	श्र (श्‌र)	श्ल (श्‌ल)
श्व (श्‌व)	ष्ट (ष्‌ट)	ष्ठ (ष्‌ठ)
ष्ण (ष्‌ण)	ष्प (ष्‌प)	ष्म (ष्‌म)
ष्य (ष्‌य)	ष्र (ष्‌र)	ष्व (ष्‌व)
स्क (स्‌क)	स्त (स्‌त)	स्थ (स्‌थ)
स्न (स्‌न)	स्म (स्‌म)	स्य (स्‌य)

स्र (स्‌र)	स्व (स्‌व)	ह्न (ह्‌न)
ह्म (ह्‌म)	ह्य (ह्‌य)	ह्र (ह्‌र)
ह्ल (ह्‌ल)	ह्व (ह्‌व)	ह्ण (ह्‌ण)
क्त्व (क्‌त्‌व)	क्म्य (क्‌म्‌य)	क्ष्ण (क्‌ष्‌ण)
क्ष्य (क्‌ष्‌य)	क्ष्व (क्‌ष्‌व)	ग्र्य (ग्‌र्‌य)
ङ्क्त (ङ्‌क्‌त)	ङ्घ्य (ङ्‌घ्‌य)	च्छ्र (च्‌छ्‌र)
च्च्व (च्‌च्‌व)	च्छ्व (च्‌छ्‌व)	ण्ठ्य (ण्‌ठ्‌य)
त्प्र (त्‌प्‌र)	त्त्र (त्‌त्‌र)	त्र्य (त्‌र्‌य)
त्स्न (त्‌स्‌न)	त्म्य (त्‌म्‌य)	द्ब्र (द्‌ब्‌र)
द्र्य (द्‌र्‌य)	द्ध्य (द्‌ध्‌य)	द्भ्र (द्‌भ्‌र)
स्त्र (स्‌त्‌र)	ह्म्य (ह्‌म्‌य)	क्ष्म्य (क्‌ष्‌म्‌य)

अक्षराणि मेलयित्वा वाचनार्थं

पदानि ।

एतेषाम् अर्थो ज्ञातव्य इति निर्बन्धो नास्ति ।

राजा	नदी	रविः	मेघः
बुधः	गुरुः	वायुः	जनः

बालः	भारः	रथः	गजः
वेदः	योधः	दासी	मही
पाकः	सेवा	नीतिः	लोभः
मणिः	लाभः	वृथा	देवः
जलम्	फलम्	धनम्	वनम्
सुखम्	बीजम्	गृहम्	कृशम्
मयूरः	अतिथिः	सारथिः	पावकः
विनयः	लगुडः	लेखिनी	याचकः
तृषितः	विहगः	मिथिला	आकाशः
स्वामिनी	पार्वती	समुद्रः	उद्योगः
वस्त्राणि	शिष्याय	सर्वेभ्यः	प्रासादः
पुष्पाणि	श्वशुरः	मित्राणि	वसिष्ठः
पण्डिताः	ब्राह्मणः	वृक्षात्	ईश्वरः
निर्झरः	प्रकाशः	गच्छामि	पश्यन्ति
वाल्मीकिः	मार्जारः	निर्वेदः	मनुष्यः
सज्जनः	भ्रमरः	उत्तिष्ठ	हर्म्येषु

लघूनि वाक्यानि ।

पाठः १

प्रथमा विभक्तिः

राजा जयति । २. नदी प्रवहति । ३. रविः प्रकाशते । ४. मेघो वर्षति । ५. बुधो जानाति। ६. मयूरो नृत्यति । ७. गुरुः आगच्छति । ८. वायुः वाति । ९. जलं स्यन्दते । १०. बुधौ शाम्यतः । ११. हस्तौ हरतः । १२. मृगौ धावतः । १३. जनाः अटन्ति । १४. बालाः क्रीडन्ति । १५. पर्णं पतति । १६. नेत्रे स्फुरतः । १७. कमलानि वेपन्ते । १८. अतिथिः आगच्छति । १९. पावको दहति । २०. वृश्चिकः दशति ॥

पाठः २.

द्वितीया विभक्तिः ।

पितरं पुत्रो नमति । २. धनं स्तेनः चोरयति । ३. भारं किङ्करो वहति । ४. ग्रामं पुरुषौ गच्छतः ।

५. रथं सारथिः नुदति। ६. जननी मूर्खः ताडयति। ७. गजान् सिंहः प्रहरति। ८. वेदं विप्रः पठति। ९. शरीरं पीडयति व्याधिः १०. तृणानि अश्वाः भक्षयन्ति। ११. शरान् योधो मुञ्चति। १२. स्वामिनीं दासी सेवते। १३. अनृतम् अयोग्या भाषन्ते। १४. महीं नृपो रक्षति। १५. धनं धनिको यच्छति। १६. पार्वतीं भजन्ति भक्ताः। १७. छत्रं बालो धारयति। १८. बुधान् शंसन्ति राजानः। १९. सुखं साधवो लभन्ते॥

पाठः ३.

तृतीया विभक्तिः।

नयनाभ्यां पश्यन्ति जनाः। २. विनयेन शोभते रामः। ३. पुष्पैः देवं पूजयन्ति। ४. लगुडेन ताडयति स्तेनः। ५. लेखिन्या लिखति लिपिकरः।

---

१२. स्वामिनी = Mistress.

४. लगुडः = A stick. ५. लेखिनी = Writing pen. लिपिकरः = A clerk.

६. पूजया विष्णुः तुष्यति । ७. वायुना समुद्रः क्षुभ्यति । ८. वृष्ट्या दावाग्निः शाम्यति । ९. नीत्या पालयति पार्थिवः । १०. जानुभ्यां बालाः चङ्क्रमन्ते । ११. लोभेन कीर्तिः नश्यति । १२. कृष्या कर्षका जीवन्ति । १३. मणिना शोभते सर्पः । १४. भार्यया सह राम आगतः । १५. उद्योगेन धनं लभन्ते मनुष्याः । १६. वयस्येन सह कृष्णः आलपति । १७. संक्रमेण नदीं तरति । १८. अन्यायेन धनं मा आर्जय । १९. वृक्षैः निबिडमिदं काननम् । २०. वाल्मीकिना रामायणं व्यरच्यत ॥

पाठः ४.

चतुर्थी विभक्तिः ।

याचकेभ्यो दक्षिणां यच्छति धनी । २. सुखाय यत्नं करोति जनः । ३. अश्वेभ्यः चणका

---

८. दावाग्निः = The fire in a forest. १०. चंक्रमन्ते = Move on fours, தவிழ்கின்றன. १७. संक्रमः = A bridge, வாராவதி.

हिताः । ४. नृपाय स्वस्ति भवतु । ५. भार्यायै भर्ता वृत्तं कथयति । ६. यतिभ्यो भिक्षां दद्मः । ७. शङ्कराय अभिषेको रोचते । ८. पूजायै पुष्पाणि आनयति शिष्यः । ९. भोजनाय पाकं करोति भार्या । १०. क्रीडायै बाला उद्यानं विशन्ति । ११. लाभाय प्रवर्तते वणिक् । १२. तृषिताय जलं यच्छेत् । १३. स्नुषायै वस्त्राणि यच्छति श्वश्रूः । १४. सुखाय दुःखं सहते द्विजः । १५. शिष्याय क्रुध्यति गुरुः । १६. सेवकाय वृथा त्वं क्रुध्यसि । १७. अयोध्यायै दूतं प्रेषयामि । १८. रिपवेऽपि दुःखं मा भवतु । १९. सर्वाभ्यः प्रजाभ्यः शुभं भवतु । २०. देवेभ्यः सुधां विभजति हरिः ॥

पाठः ५.

पञ्चमी विभक्तिः ।

वनात् निवर्तते पुरुषः । २. नगरात् वनं क्रोशः । ३. प्रासादात् पतितो बालः । ४. क्रो-

घात् दुःखं जायते। ५. विनयात् सुखम् उद्भवति। ६. आसनात् उत्तिष्ठति पिता। ७. बीजात् अङ्कुरम् उद्भवति। ८. हिमवतो गङ्गा प्रभवति। ९. चन्द्रात् नीहारः पतति। १०. सूर्यात् उष्णं भवति। ११. मालायाः पुष्पाणि गलन्ति। १२. घटात् वारि स्रवति। १३. विद्यायाः हर्षो जायते। १४. गृहात् बहिर्गच्छति पुरुषः। १५. खलेभ्यः सज्जनानां भीतिर्वर्तते। १६. वापीभ्यो जलम् आनयति किङ्करः। १७. चोरेभ्यो रक्ष मां राजन्। १८. श्वशुरात् लज्जते वधूः। १९. चिन्तायाः शरीरं कृशं जायते। २० पुत्रम् अमार्गात् निवर्तय॥

पाठः ६.

षष्ठी विभक्तिः।

साधूनां वाचि अमृतं वर्तते। २. लतानां पुष्पाणि सुरभीणि। ३. नक्षत्राणां प्रकाशः स्वल्पः। ४. मित्राणाम् अभ्युदयं काङ्क्षामि।

५. मिथिलायाः राजा जनकः । ६. जगतः स्रष्टा ब्रह्मा । ७. भार्यायाः पिता श्वशुरः । ८. बालस्य करौ कोमलौ स्तः । ९. कुशो लवश्च सीतायाः पुत्रौ । १०. नृपस्य जये जना मोदन्ते । ११. पर्वतस्य शोभां पश्य । १२. मयूरस्य पिच्छं चारु वर्तते । १३. मूर्खाणां लज्जा नास्ति । १४. पार्वत्याः सूनुः गणेशः । १५. आचार्यस्य चरणौ शिष्यः क्षालयति । १६. लक्ष्म्याः पतिर्विष्णुः । १७. वसिष्ठस्य धेनुं विश्वामित्रः अपहरति । १८. मम पुत्र्या विवाहोऽद्य प्रचलति । १९. वाल्मीकेराश्रमो दूरे वर्तते । २०. देवानां जरा नास्ति ॥

पाठः ७.

सप्तमी विभक्तिः ।

लोके मूर्खाः बहुलाः ; पण्डिताः स्वल्पाः । २. उदधौ नौकाः प्लवन्ते । ३. उदके मत्स्या व-

---

१२. चारु = Beautiful.

२. प्लवन्ते = Float.

सन्ति । ४. पञ्जरे शुको वर्तते । ५. विद्यायां प्रज्ञानाम् आदरः । ६. रथ्यायां जना गच्छन्ति । ७. आकाशे नक्षत्राणां राशयो वर्तन्ते । ८. हर्म्येषु घनिका वसन्ति । ९. साधुषु सर्वे स्निह्यन्ति । १०. छायायाम् उपविशन्ति पान्थाः । ११. ब्राह्मणेषु आर्जवमस्ति । १२. गिरौ श्वापदाः सन्ति । १३. रात्रौ चोरः चोरयति । १४. अम्बुनि कमलानि रोहन्ति । १५. उद्याने विहरन्ति नार्यः । १६. आकाशे मेघमाला सञ्चरति । १७. वृक्षेषु मर्कटाः प्लवन्ते । १८. घर्मे सरित्सु जलं शुष्यति । १९. पुष्पेषु भ्रमरा उपविशन्ति । २०. द्रव्ये सर्वेषां स्पृहा वर्तते ॥

---

४. पञ्जरः = A cage. ११. आर्जवम् = Propriety straightforwardness, ஒழுங்கு.

१२. श्वापदः = A beast of prey. १६. मेघमाला = A long line of clouds. १७. प्लवन्ते = Jump.

पाठः ८.

सम्बुद्धिः।

राजन्! राज्यं धर्मेण पालय। २. पुत्र! त्वं श्लाघनीयोऽसि। ३. हरे! दयालो! नः पाहि। ४. ऋषयः! भवतोऽहं शरणं प्रपन्नः। ५. कन्ये! उत्तमं पतिं प्राप्नुयाः। ६. गुरो! त्वामहं वन्दे। ७. निषाद! त्वं शाश्वतीः समाः प्रतिष्ठां मा गमः। ८. विष्णो! त्वं देवेषु परमः। ९. शुक! तव मधुराणां गिरां फलं पञ्जरबन्धः। १०. वायो! रेणूंस्त्वमपहरसि। ११. कवे! एकं श्लोकं कवय। १२. लते! वृक्षमालिङ्ग। १३. लक्ष्मि! अपाङ्गेन मां पश्य। १४. वेधः! त्वं प्रजाः सृजसि। १५. पितः! मम भागं देहि। १६. मातः! क्षुधितोऽहम्। १७. वटो नित्यं

---

२. श्लाघनीयः = Praise worthy. ४. शरणम् = A protector. ७. प्रतिष्ठा = Happiness. १५. भागः = A share. १७. वटुः = A lad, the Brahmachari.

सन्ध्यावन्दनं कुरु । १८. शिष्याः ! पाठान् सम्यक् पठत । १९. श्रीकृष्ण ! वेणुं वादय । २०. ईश्वर ! राजानं रक्ष ॥

पाठः ९.

वृक्षेषु फलानि पश्यामः । २. मम यत्नः सफलो जातः । ३. कुचेलो गोविन्दं याचते धनम् । ४. पुत्रेण सह आगतः पिता । ५. लताभिः शोभते वृक्षः । ६. वृद्धां मातरं गृहं नयति पुत्री । ७. तपस्वी नद्यास्तीरे वसति । ८. वसिष्ठो दशरथेन सह भाषते । ९. वृक्षात् विहगा उड्डयन्ते । १०. रामः एकेन बाणेन ताटकां प्राहरत् । ११. अद्रौ मधुनो धाराः गलन्ति । १२. गौः मधुरं क्षीरं ददाति । १३. मार्जारः पयः पिबति । १४. काकः कदलीफलमत्ति । १५. सः

---

१९. वेणुः = A flute.

भार्यायाः मरणेन निर्वेदं प्राप्तः। १६. अश्वेभ्यो यवसं देहि। १७. मालाकारः पुष्पाणि आनयति। १८. ग्रीष्मे व्यजनस्योपकारो महान्। १९. नरो वस्त्रेण शरीरम् आच्छादयति। २०. राजा दुष्टान् दण्डयति।

पाठः १०.

आङ्गलानां शर्मण्यानां च युद्धमभवत्। २ युद्धे कुशला आङ्गला ईश्वरकृपया शर्मण्यानजयन्। ३. भार्याया अपराधं भर्ता क्षमते। ४. दिलीपः मुनेर्धेनुमसेवत। ५. जलस्य स्वभावः शैत्यम्। ६. तस्य वचने अनृतं नास्ति। ७. देवाः ब्रह्माणं शरणमगच्छन्। ८. आतपेन श्रान्ताः करिणो नदीं व्यगाहन्त। ९. राजा बहून् दिवसान् वनेऽवसत्। १०. भो बालक! तव माता पिता च

---

१५. निर्वेदः = Absence of worldly desires. १६. यवसम् = Grass. १८. व्यजनम् = A fan.

२. शर्मण्यः = A German. ५. शैत्यम् = Coldness.

काश्यां वर्तेते । ११. नर्मदायास्तीरे माहिष्मती नाम नगरी वर्तते । १२. मधुरेण स्वरेण उरगा मुह्यन्ति । १३. चातकस्य ग्रीवायां छिद्रमस्ति । १४. रामः जनकस्य दुहितरं परिणयति । १५. तातस्याज्ञया राघवोऽरण्यं प्राविशत् । १६. धाता प्रथमं मृगान् ततो मनुष्यांश्चासृजत् । १७. तुभ्यं किमर्थं रामः कुप्यति ? । १८. दमयन्ति ! अनेन मार्गेण विदर्भान् गच्छ । १९. प्रथमं सम्यक् विचारय ; ततः कार्यं कुरु । २०. इयं कन्या पाठशालायां किमभ्यस्यति ? ॥

पाठः ११.

बुद्धिमतां यत्नाः सफला भवन्ति । २. ईश्वर एव मनुष्याणां दुःखं ददाति, परिहरति च । ३. दैवम् अतिक्रमितुं न कोऽपि शक्नोति । ४. बुद्धि-

हीनानां दुःखान्युद्भवन्ति। ५. धीमन्तो दुःखानि बुद्ध्या परिहरन्ति। ६. इन्दोः प्रकाशो दिवसे न दृश्यते। ७. पर्वतात् निर्झरः पतति। ८. कुमारस्य आचारं दृष्ट्वा वयं तुष्यामः। ९. विनाऽपराधं कमपि न दण्डय। १०. कारणं विनाऽपि खलः साधून् अधिक्षिपति। ११. जननी रुदन्तं बालं सान्त्वयति। १२. सहदेवो नकुलात्कनीयान्। १३. रामस्य पादधूल्या शिला स्त्री अभवत्। १४. सः निखिलं वृत्तम् अकथयत्। १५. नलो विजने वने भार्यामत्यजत्। १६. अध्वगमनेन श्रान्तां द्रौपदीं घटोत्कचोऽवहत्। १७. सिंहात् भीता मृगाः पलायन्ते। १८. सः असाध्ये कार्ये यत्नं करोति। १९. यां बालां पूर्वेद्युरावाम् अपश्याव तामाह्वय। २०. इदं फलं सदक्षिणाकं सताम्बूलं च तुभ्यमहं सम्प्रददे।

---

७. निर्झरः = A water-fall. १२. कनीयस् = Younger. १३. धूलिः = Dust.

पाठः १२.

नारदः वीणां वादयन् अम्बरात् अवातरत् । २. स्त्रियं बाल्ये पिता रक्षति । ३. तां यौवने भर्ता रक्षति । ४. तामेव पुत्रो वार्द्धके रक्षति । ५. कदापि स्त्रियाः स्वातन्त्र्यं नास्ति । ६. गावः पुच्छान् उन्नमय्य धावन्ति । ७. छत्रं जनान् आतपात् रक्षति । ८. नृपाणां शौर्यं युद्धे व्यक्तं भवति । ९. बालाः कन्दुकैः क्रीडन्ति । १०. पश्येमं घटिकारम् । ११. बम्भरं भ्रमयति बालः । १२. पितुराचारमवश्यमनुसर । १३. हरिणा बालतृणानि खादन्ति । १४. गजो वृक्षम् अधः पातयति । १५. पार्थिवाः पण्डितेभ्यो धनं यच्छन्ति । १६. इमे कस्य पुत्र्यौ ? १७. किं तव नामधेयम् ?। १८. का तव जननी ?। १९. यूयं कस्मिन् देशे वसथ ?। २०. तौ दम्पती सुखेन वसतः ॥

---

९. कन्दुकः = A ball. १०. घटिकारः = A clock. ११. बम्भरः = Top, பம்பரம்.

पाठः १३.

नकुलः सर्पं खण्डयति । २. स्वेदात् यूकाः उद्भवन्ति । ३. गोमये कृमयो जायन्ते । ४. इयं पाठशाला कन्यानाम् । ५. मम अङ्गुलीयकं मार्गे पतितम् । ६. कशयाऽश्वं ताडयति सारथिः । ७. सन्तोषेण धैर्यं वर्धते । ८. यदृच्छया त्वामहमद्य पश्यामि । ९. यमुनायाः जले बृहन्तः कमठाः प्लवन्ते । १०. नृपश्चोरान् कारागृहे निक्षिपति । ११. द्विजाः यज्ञोपवीतं धारयन्ति । १२. सूदो दर्व्या परिवेविष्टे । १३. राज्ञी शिबिकायाम् उपविश्य याति । १४. दरिद्राः यवागूं पिबन्ति । १५. मान एवोत्तमं धनम् । १६. सूर्योऽन्धकारं नाशयति । १७. अलकनन्दाया जलं शीतलम् ।

---

२. यूका = A louse, பேன். ६. कशा = A whip. ८. यदृच्छा = Unexpectedly. ९. कमठः = A tortoise. १२. दर्वी = A spoon. १३. शिबिका = palanquin. १४. यवागूः = Rice water, கஞ்சி.

१८. अस्य तटाकस्योदकं स्वादु। १९. काश्याः प्रतिनिवृत्तस्य मम षट् वर्षाणि।

पाठः १४.

अग्निः कक्षं दहति। २. शुकशाबकः बिम्बफलं चञ्च्वा दशति। ३. प्रभुः सेवकाय वेतनं यच्छति। ४. इन्द्रस्य जाया शची। ५. सर्पो धूमेन क्लाम्यति। ६. चोरः पान्थानां धनम् अपहरति। ७. अहं नाटकं द्रष्टुं गच्छामि। ८. त्वमपि आगच्छसि चेदागच्छ। ९. मम पिता मां ताडयेत्तस्मान्नागच्छामि। १०. अहं तुभ्यं धनं ददामि आगच्छ। ११. मया पाठा न पठिताः। १२. मातामहो नप्तारं शिरसि जिघ्रति। १३. पर्वतोऽग्निमान् धूमवत्त्वात्। १४. जना देवालयं

---

१. कक्षः = Hay cock, வைக்கோல் போர். २. बिम्ब-फलम् = கோவைப்பழம், तोंडोळीचेंफळें. चञ्चुः = A beak.

गच्छन्ति । १५. अद्यारभ्य देवालये नव दिनानि उत्सवो भविष्यति । १६. सेना गिरिम् आरोहति । १७. शोको धैर्यं हरति । १८. किङ्करो जलमाहरति । १९. योधः शत्रुं प्रहरति । २०. पौराणिकः पुराणम् उपसंहरति ।

पाठः १५.

पशुपतिर्जनान्रक्षति । २. जनाः पशुपतिना रक्ष्यन्ते । ३. बालः श्लोकं पठति । ४. श्लोको बालेन पठ्यते । ५. देवं नमामि । ६. देवो मया नम्यते । ७. चन्द्रं पश्यसि । ८. चन्द्रः त्वया दृश्यते । ९. सारथिः रथं नयति । १०. सारथिना रथो नीयते । ११. वायुः रेणून् हरति । १२. वायुना रेणवो ह्रियन्ते । १३. माता शिशुम् आश्लिष्यति । १४. मात्रा शिशुः आश्लिष्यते । १५. ब्रह्मा लोकान् सृजति । १६. ब्रह्मणा लोकाः

सृज्यन्ते । १७. गोपो गाश्चारयति । १८. गोपेन गावः चार्यन्ते । १९. मेघः करकाः किरति । २०. मेघेन करकाः कीर्यन्ते ॥

पाठः १६.

पथि मूत्रं पुरीषं वा मा कुरु । २. साधून् मा दूषय । ३. कोकिलस्य वाचि माधुर्यम् अस्ति । ४. दाता जन्मान्तरे धनवान्भवति । ५. सः सप्तभिरहोभिः श्रीभागवतमपठत् ! ६. मृषाविवादात्त्वं दूरे तिष्ठ । ७. निर्दोषं धार्मिकं च मा नाशय । ८. मा त्वमुत्कोचं ग्रहीः । ९. वैदेशिकं नोपद्रव । १०. अन्यायेन वित्तं माऽऽर्जय । ११. सायं प्रातरीश्वरं स्तुहि । १२. मा मृषासाक्ष्यं वद । १३. गुरूणां वचनं न लङ्घयेत् । १४. भो अध्येतारः! सूर्योदयात्प्राक् प्रतिबुध्यध्वम् । १५. पितरौ वन्दस्व । १६. आचारवान् भव । १७. सर्वेषु प्राणिषु करुणां कुरु । १८. दिवसं

सत्कार्येण सार्थकं कुरु। १९. असद्भिः सह न सङ्गच्छस्व। २०. प्रसन्नो देवो भक्तेभ्यो मङ्गलानि कुर्यात् ॥

कथा प्रथमा १.

अनृतवादिनो बालकस्य।

आसीत्कस्मिंश्चिदग्रहारे कश्चिद्ब्राह्मणः। तस्य एकः कुमार आस्त। स द्विजः कदाचित् तेन कुमारेण सह काशीं गन्तुं प्रतस्थे। मध्ये मार्गं स बालः "तात व्याघ्र आगच्छति व्याघ्र आगच्छति" इति मृषैव आक्रन्दत्। तदा स ब्राह्मणः परावृत्य अपश्यत्। तत्र व्याघ्रो नैवासीत्। ततः पितरि पुरस्तात् किञ्चिद्दूरं गच्छति वास्तविकः शार्दूल आगतः। अथ स बालः तं शार्दूलं दृष्ट्वा भयोद्विग्नमनाः "तात शार्दूलः शार्दूल" इति पुनःपुनः अक्रोशत्। अयम् इदानीमपि मिथ्यावदतीति मत्वा पिता अपरावर्तमान एव अगच्छत्। तदा व्याघ्र आगत्य पृष्ठतः गच्छन्तं तं बाल-

मपाहरत्। तस्मादनृतवादिभिः कदाचित् सत्यमुक्तमपि जनो न प्रतीयात् ॥

कथा द्वितीया २.

कुक्कुरतत्प्रतिबिम्बयोः ।

कश्चित्कुक्कुरः अपूपं मुखेन आदाय नद्याः पारं गच्छन् मध्ये स्वस्य प्रतिबिम्बं जलेऽपश्यत्। तदा सोऽचिन्तयत्। "अयमन्यः सारमेयो मुखे अपूपं गृहीत्वा गच्छति, तमप्यहम् अपहरिष्यामि" इति। यदा स श्वा प्रतिबिम्बमुखस्थं अपूपं ग्रहीतुं मुखं व्याददात्, तदा तस्य मुखात् सोऽपूप उदके पपात। स पुनस्तं नालभत। तस्मात् य ईश्वरदत्तं नालमिति मन्यते तस्य स्वकीयोऽप्यर्थो नश्यति ॥

कथा तृतीया ३.

शृगालद्राक्षाफलयोः ।

कश्चित् शृगालः क्षुधार्तः परिभ्रमन् द्राक्षा-

मण्डपमेकमपश्यत्। तत्रागत्य मुखमुन्नमय्य लतासु पक्कान् द्राक्षागुच्छान् ऐक्षत। सः फलानि प्राप्तुम् उत्पत्योत्पत्य अयतत। परं तु मण्डपस्य उन्नतत्वात् स शृगालः एकमपि फलं नालभत। अन्ततः किञ्चिद्दूरं गत्वा परावृत्य द्राक्षामण्डपं दृष्ट्वा "नाहमेतानि अम्लानि भक्षणानर्हाणि फलानि अभिलषामि" इति वदन् प्रस्थितः। कतिचन मनुजा अलभ्ये वस्तुनि कमपि दोषमुद्घाट्य आत्मनो लघिमानं छादयन्ति।

कथा चतुर्थी ४.

बालतस्करयोः।

कोऽपि बालः कूपोपकण्ठे रुदन्नास्त, तदा कश्चिच्चोरः तं प्रदेशम् आजगाम। स तं बालमवलोक्य "अये! कूपस्य तीरे उपविश्य किमर्थं रोदिषि" इत्यपृच्छत्। स बालः तं प्रत्यब्रवीत् "अहम् अत्रैव एकेन सवयसा सह क्रीडन्नासम्। सः मम कण्ठे स्थितां स्वर्णमालाम् आकृष्य अस्मिन् कूपे प्राक्षिपत्। यद्यहं

स्वर्णमालाहीनो मम गृहं गच्छेयं तदा मम पिता मां ताडयेदिति रोदिमि" इति। स चोरः "तां स्वर्णशृङ्खलाम् अहमपहरेयम्" इत्यालोच्य "बालक! त्वं मा भैषीः। अहम् एतस्मिन् कूपेऽवतीर्य त्वदीयां मालाम् उद्धृत्य दास्यामि। मम वस्त्राणि पालयन् आस्व" इत्युक्त्वा स्वस्य वस्त्राणि उपरि निधाय कौपीनं धृत्वा कूपे ममज्ज। तस्य मज्जनानुपदं स बालकः तदीयान् पटानपहृत्य त्वरितं गृहमगच्छत्। ततः स तस्करः तस्मिन् कूपे चिरं विचित्यापि ग्रैवेयकं न लेभे। तत उपर्यागत्य तं बालकं स्वस्य वस्त्राणि च नापश्यत्। तदा स चोरः "अहमेव वञ्चक इति मन्यमानं मामप्येको बालकः अवञ्चयत्" इति विस्मयमानः सन् जगाम। तस्माद्वञ्चनशीलः स्वयमपि वञ्च्यते॥

कथा पञ्चमी ५.

व्याघ्रबकयोः।

कस्मिंश्चिद्विपिने एको व्याघ्रः सर्वानपि मृगान्

व्यापाद्य भक्षयन्नवर्तत । अथैकस्मिन्दिने मेषमेकं व्यापाद्य सत्वरमभक्षयत् । तस्यैकम् अत्यल्पम् अस्थिशकलं गलेऽलगत् । तच्छकलं स्वयमेव बहिर्निष्कासयितुं बहुधा यतमानोऽपि न शशाक । ततः स वृक्षोपरि स्थितं बकं दृष्ट्वा हे बक ! मद्वदनस्थम् अस्थिखण्डं कृपयोद्धृत्यमां जीवयसि चेत् अनल्पं पारितोषिकं ते दास्यामि" इत्यवदत् । स बकस्तच्छ्रुत्वा पारितोषिकलोभेन तस्य वदने स्वीयां दीर्घां ग्रीवां प्रवेशयामास । ततः तच्छकलमुद्धृत्य व्याघ्रमालोक्य "हेव्याघ्र ! पारितोषिकं मे देहि !" इत्यपृच्छत् । ततो व्याघ्रो विस्फारितलोचनः तमवदत् । "रे मूर्ख ! मद्वदनप्रवेशकाले तव कंधरां अखण्डयित्वा त्वां प्राणैः सहात्यजं किल । तावता असन्तुष्य अन्यत् पारितोषिकमपि अपेक्षसे ! इतः परमत्रातिष्ठन् झटिति धाव" इत्यब्रवीत् । तस्माद्दुर्जनेषु कृतस्योपकारस्य तेषामपकाराकरणमेव महत्पारितोषिकमिति सन्तोष्टव्यम् ॥

कथा षष्ठी ६.

ब्राह्मणीनकुलयोः ।

चोलदेशे सुशीलो नाम ब्राह्मणः आसीत् । स चैकं नकुलमपोषयत् । स कदाचित् प्रातरुत्थाय शालेयक्षेत्रदर्शनाय बहिर्जगाम । ततः तत्पत्नी स्वापत्यं डोलायां शाययित्वा नकुलं तस्य निकटे स्थापयित्वा स्नातुं तटाकमगच्छत् । तदा कश्चित् सर्पः डोलायाः समीपमाययौ । तदा स नकुलस्तं सर्पं खण्डशः छित्वा रक्तसिक्ताङ्गः तामभिययौ । सा तं दृष्ट्वा "अयं मम शिशुमच्छिनत्" इति मत्वा रुषा दण्डेन तमताडयत् । सोऽम्रियत । ततः सा स्वभवनमागत्य डोलायां सुखेन स्वपन्तं बालकम्, अधस्तान्नकुलेन खण्डितमहिं च वीक्ष्य "अहो! महापापिन्यहं शिशुरक्षिणम् उरगघ्नं मम भर्त्रा पुत्रवद्रक्षितम् अनपराधिनं नकुलं समहरम्" इति शुशोच । तस्मात् अविमृश्यकारिणाम् एवं विधानि पापानि सम्भवन्ति ॥

कथा सप्तमी ७.

बालकव्यवहारस्य ।

मालवदेशे कश्चिद्विप्र आसीत् । तस्य द्वे भार्ये आस्ताम् । तयोर्द्वयोराद्या पुत्रमसूत । ते सपत्न्यौ समप्रीत्या तं बालकमपोषयताम् । इत्थं पोषयन्त्योस्तयोः दैववशात् शिशुमधिकृत्य परस्परं कलहः समभवत् । ततः कनीयसी शिशुरयं मदीय इत्युक्त्वा तं सुतमादाय गन्तुमुपाक्रमत । ज्यायसी तु मत्पुत्रं मा स्पृशेति तां रुरोध । ततस्ते सपत्न्यौ न्यायाधिपतिसमीपमापतुः । न्यायाधिपश्च व्यवहारतत्वे अनिर्णीते युक्त्या व्यवहारं निर्णेतुमुपचक्रमे । ततस्सः इमं शिशुं द्वेधा विदार्य द्वाभ्यां देहीति स्वभृत्यमवदत् । तदा कनीयसी न्याय्यमेतत् तथैव क्रियतामित्यवदत् । ज्यायसी तु स्वामिन्नेष बालकस्तदीय एव अस्तु न मदीयः; तस्मान्मा विदारय, तस्या एव दापयेत्यवदत् । तच्छ्रुत्वा सोऽधिकारी इयमेव एतस्य

जननीति निश्चित्य तं शिशुं ज्यायस्यै अदापयत्। तदा सर्वे च सभ्यास्तमधिकारिणं प्रशशंसुः। तस्माज्जनन्यः स्वापत्यानां क्षेममेव चिन्तयन्ति ॥

कथा अष्टमी ८.

अजशिशुव्याघ्रयोः।

एकदा निदाघे घर्मार्त एकः अजशिशुः जलं पातुं गिरिनदीमगच्छत्। स तत्र उन्नतप्रदेशे जलं पिबन्तं व्याघ्रमपश्यत्। तं दृष्ट्वा सोऽजशिशुः चकितो निम्नप्रदेशं गत्वा जलमपिबत्। तदा स व्याघ्रस्तं दृष्ट्वा "कलहमुत्पाद्य एनं व्यापाद्य भक्षयामि" इत्यालोच्य तमभिगत्य रे दुष्ट! किमेवमाविलयसि मया पीयमानं जलम्?" इत्यवदत्। तदाकर्ण्य सोऽजशिशुर्भीतः सविनयमेवं व्यजिज्ञपत्। "भो द्वीपिन्! कुतस्त्वमकाण्डे कुप्यसि? तव स्थानात् यज्जलं प्रवहति तत्खल्वहं पिबामि? एवं स्थिते मया कलुषितं जलं कथम् अधित्यकायां स्थितस्य तव स-

काशमागच्छेत् ?" इति । अस्तु नामैतत् हे पापिन् षड्भ्यो मासेभ्यः प्राक् मां त्वमशप इति शृणोमि तत्कुतः" इति व्याघ्रोऽवदत् । तच्छ्रुत्वा सोऽजशिशुरवदत् । "जातस्य मम मासत्रयमपि न पूर्णम् । सोऽहमपूर्णत्रिमासः षण्मासेभ्यः प्राग्भवन्तमशपमिति कथं विश्वसनीयं भवेत् ?" इति । एतच्छ्रुत्वा स व्याघ्रः "अहो ! विस्मृत्याहमवदम्, न तावत्त्वं शप्तवान्, किं तु तव पिताऽशपत् । पितुः द्रव्यस्य यथा त्वं भागी, तथा त्वमेव तत्कृतापराधस्यापि पात्रमसि" इत्युक्त्वा तदुपरि निपत्य तमवधीत् । तस्मात् दुर्जनाधिष्ठिते प्रदेशे साधुभिः सुतरां न गन्तव्यम् ॥

कथा नवमी ९.

काकगोमाय्वोः ।

कश्चन शृगालोऽरण्ये आहारार्थं चिरं भ्रमित्वापि किमप्यलभमानः क्षुधितः कस्यचित्तरोर्मूलमाससाद । ततः कश्चित्काको मांसखण्डं मुखे धृत्वा उपविश्य

खादितुं तमेव पादपम् आससाद। तं दृष्ट्वा स श्रृगालः "इदं मांसखण्डमनायासेन कथं हरेयम्?" इत्यालोच्य तं स्तोतुमारभत। "अये काक! त्वं पक्षिणां मध्ये नितरां सुखी। तव रूपमतीव शोभनं वर्तते। तव स्वरोऽतीव मधुरः। तव स्वरं परुत्[1] अश्रृणवम्। तस्य पुनः श्रवणेऽतीवाभिलाषो वर्तते। तस्मात्त्वं गाय" इत्यवदत्। काकस्तस्य छलस्तुतिं श्रुत्वा गातुमारभत। गातुं प्रवृत्तस्यैव तस्य मुखान्मांसखण्डं भूमौ पपात। तद्गृहीत्वा तन्मौर्ख्यमुपहसन् जम्बुकः स्वाभिमतं प्रदेशं जगाम। तस्माद्यः स्तुतिप्रियः स वञ्च्यतैव॥

कथा दशमी १०.

भेकानां बालकानां च।

एकदा केचिद्बालाः कस्यचित्सरसस्तीरे मिलित्वा जले लोष्टप्रक्षेपणेन क्रीडन्त आसन्। तस्मिन्

---

१ अतीतवत्सरे।

सरसि स्थिता अनेके भेकाः लोष्टैरहन्यन्त । ते समेत्याब्रुवन् । "किं कुर्मः? क्व गच्छामः? को नस्त्राता भवेत्?" इति। तेष्वेको वृद्धो मण्डूकस्तान् बालानित्थमवदत्? "भो बालकाः! किमर्थं निरपराधिनः अस्मान् हथ?" इति । "न वयं युष्मान् हन्मः; किन्तु लोष्टैः क्रीडाम" इति ते प्रत्यब्रुवन्। सोऽवदत् "इयं भवतां क्रीडैव, नात्र संदेहः; अस्माकं तु प्राणहानिः" इति। तच्छ्रुत्वा ते बालाः तां क्रीडामत्यजयन् । तस्माद्विनोदार्थमपि परेषां हिंसाकरं कर्म न कर्तव्यम् ॥

॥ अथ संग्रहमनुस्मृतिः ॥

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥ १ ॥

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ २ ॥

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ ३ ॥

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ ४ ॥

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥ ५ ॥

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ॥ ६ ॥

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥ ७ ॥

चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ।
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ॥ ८ ॥

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ॥ ९ ॥

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥ १० ॥

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥ ११ ॥

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥ १२ ॥

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥ १३ ॥

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥ १४ ॥

समाहृत्य तु तद्भैक्षं यावदर्थममायया ।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥ १५ ॥

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।
दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥ १६ ॥

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति ।
अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम् ॥ १७ ॥

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ १८ ॥

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥ १९ ॥

शौचेप्सुः सर्वदाऽऽचामेदेकान्ते प्रागुदङ्मुखः ॥ २० ॥

उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ॥ २१ ॥

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य ह्यधिके ततः ॥ २२ ॥

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ।
एष प्रोक्तो द्विजातीनामौपनायनिको विधिः ॥ २३ ॥

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्यं च सन्ध्योपासनमेव च ॥ २४ ॥

अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥ २५ ॥

पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् ।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥ २६ ॥

पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ।
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् ॥ २७ ॥

अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितम् ।
आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः ॥ २८ ॥

लौकिकं वैदिकं वापि तथाऽऽध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥ २९ ॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥ ३० ॥

अभिवादात्परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥ ३१ ॥

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ ३२ ॥

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ ३३ ॥

न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥ ३४ ॥

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ ३५ ॥

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥ ३६ ॥

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि ।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥ ३७ ॥

भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद् व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥ ३८ ॥

हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ ।
उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् ॥ ३९ ॥

प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ।
नोदाहरेदस्य नाम परोक्षमपि केवलम् ॥ ४० ॥

न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ।
गुरोर्गुरौ संनिहिते गुरुवद् वृत्तिमाचरेत् ॥ ४१ ॥

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥ ४२ ॥

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥ ४३ ॥
तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥ ४४ ॥

इति संग्रहमनुस्मृतौ ब्रह्मचारिप्रकरणम् ।

रघुवंशचतुर्थसर्गात्

संगृहीताः श्लोकाः ।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजस्सवित्रेव हुताशनः ॥ १ ॥
दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥
सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ३ ॥
परिकल्पितसान्निध्या काले काले च वन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ४ ॥

स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ५ ॥

मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ६ ॥

नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ ७ ॥

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ ८ ॥

वार्षिकं सञ्जहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ ९ ॥

पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥ १० ॥

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ ११ ॥

हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १२ ॥

प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ १३ ॥

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ १४ ॥

तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ १५ ॥

स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ १६ ॥

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ १७ ॥

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ १८ ॥

स सेनां महतीं कर्षन्पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ १९ ॥

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ २० ॥

पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ २१ ॥

अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ २२ ॥

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान्गङ्गास्रोतोऽन्तरेषु सः ॥ २३ ॥

आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ २४ ॥

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ २५ ॥

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ २६ ॥

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ २७ ॥

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ २८ ॥

ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ २९ ॥

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ३० ॥

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ३१ ॥

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥ ३२ ॥

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ३३ ॥

मुरलामारुतोद्धूतमगमत्कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ३४ ॥

अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ३५ ॥

खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥ ३६ ॥

अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ३७ ॥

मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ३८ ॥

पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ३९ ॥

यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ४० ॥

संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ४१ ॥

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ४२ ॥

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ४३ ॥

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ॥ ४४ ॥

तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ४५ ॥

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ४६ ॥

तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥ ४७ ॥

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुध्दूतैर्धातुरेणुभिः ॥ ४८ ॥

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ४९ ॥

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ५० ॥

तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ५१ ॥

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ५२ ॥

तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ५३ ॥

चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागरुद्रुमैः ॥ ५४ ॥

न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ५५ ॥

तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ५६ ॥

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ५७ ॥

इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ ५८ ॥

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ५९ ॥

सत्रान्ते सचिवसखः पुरस्क्रियाभि-
गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ६० ॥

ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ६१ ॥

रघुवंशे चतुर्थः सर्गः समाप्तः ॥ ४॥

श्रीरामोदन्तः ।

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम् ।
श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् ॥ १ ॥
पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥ २ ॥
ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् ।
वव्रिरे च वरानिष्टानस्मादाश्रितवत्सलात् ॥ ३ ॥

रावणो मानुषादन्यैरवध्यत्वं तथाऽनुजः ।
निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणोत च ॥ ४ ॥

विभीषणो विष्णुभक्तिं वव्रे सत्वगुणान्वितः ।
तेभ्य एतान्वरान्दत्वा तत्रैवान्तर्दधे प्रभुः ॥ ५ ॥

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम् ।
लङ्कापुरीं पुष्पकं च हृत्वा तत्रावसत्सुखम् ॥ ६ ॥

यातुधानास्ततः सर्वे रसातलनिवासिनः ।
दशाननं समाश्रित्य लङ्कायां सुखमावसन् ॥ ७ ॥

मन्दोदरीं मयसुतां परिणीय दशाननः ।
तस्यामुत्पादयामास मेघनादाह्वयं सुतम् ॥ ८ ॥

रसां रसातलं चैव विजित्य स तु रावणः ।
लोकानाक्रमयन्सर्वा जहार च विलासिनीः ॥ ९ ॥

दूषयन्वैदिकं कर्म द्विजानर्दयति स्म सः ।
आत्मजेन ततो युद्धे वासवं चाप्यपीडयत् ॥ १० ॥

तदीयतरुरत्नानि पुनरानाय्य किंकरैः ।
स्थापयित्वा तु लङ्कायामवसच्च चिराय सः ॥ ११ ॥

ततस्तस्मिन्नवसरे विधातारं दिवौकसः ।
उपगम्योचिरे सर्वं रावणस्य विचेष्टितम् ॥ १२ ॥

तदाकर्ण्य सुरैस्साकं प्राप्य दुग्धोदधेस्तटम् ।
तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः ॥ १३ ॥

आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम् ।
किमर्थमागतोऽसि त्वं साकं देवगणैरिति ॥ १४ ॥

ततो दशाननात्पीडामजस्तस्मै न्यवेदयत् ।
तच्छ्रुत्वोवाच धातारं हर्षयन्विष्टरश्रवाः ॥ १५ ॥

अलं भयेनात्मयोने! गच्छ देवगणैस्सह ।
अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम् ॥ १६ ॥

आत्मांशैश्च सुरास्सर्वे भूमौ वानररूपिणः ।
जायेरन्मम साहाय्यं कर्तुं रावणनिग्रहे ॥ १७ ॥

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः ।
पद्मयोनिस्तु गीर्वाणैस्समं प्रायात्प्रहृष्टधीः ॥ १८ ॥

अजीजनत्ततश्शक्रो वालिनं नाम वानरम् ।
सुग्रीवमपि मार्ताण्डो हनुमन्तं च मारुतः ॥ १९ ॥

पुरव जनयामास जाम्बवन्तं च पद्मजः ।
एवमन्ये च विबुधाः कपीनजनयन्बहून् ॥ २० ॥

ततो वानरसङ्घानां वाली परिवृढोऽभवत् ।
अमीभिरखिलैस्साकं किष्किन्धामध्युवास च ॥ २१ ॥

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः ।
भार्यास्तिस्रोऽपि लब्ध्वाऽसौ तासु लेभे न सन्ततिम्

ततस्सुमन्त्रवचनादृश्यशृङ्गं स भूपतिः ।
आनीय पुत्रकामेष्टिमारेभे सपुरोहितः ॥ २३ ॥

अथाग्नेरुत्थितः कश्चिद्गृहीत्वा पायसं चरुम् ।
एतत्प्राशय पत्नीस्त्वमित्युक्त्वाऽदान्नृपाय सः ॥ २४ ॥

तद्गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः ।
ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन् ॥ २५ ॥

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।
अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥ २६ ॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्राऽजीजनत्सुतौ ।
अकारयत्पिता तेषां जातकर्मादिकं द्विजैः ॥ २७ ॥

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते ।
सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥ २८ ॥

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥ २९ ॥

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।
कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥ ३० ॥

तौ गृहीत्वा ततो गच्छन्बलामतिबलां तथा ।
अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥ ३१ ॥

गच्छन्सहानुजो रामः कौशिकेन प्रचोदितः ।
ताटकामवधीद्घोरांल्लोकपीडनतत्पराम् ॥ ३२ ॥

ततस्सिद्धाश्रमं प्राप्य कौशिकः सहराघवः ।
अध्वरं च समारेभे राक्षसाश्च समागमन् ॥ ३३ ॥

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।
सुबाहुप्रमुखान्हत्वा यज्ञं चापालयन्मुनेः ॥ ३४ ॥

कौशिकेन ततो रामो नीयमानस्सहानुजः ।
अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥ ३५ ॥

जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।
सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥ ३६ ॥
ततो दशरथं दूतैरानाय्य मिथिलाधिपः ।
रामादिभ्यस्ततस्तेभ्यः सीताद्याः कन्यका ददौ ॥ ३७ ॥
ततो गुरुनियोगेन कृतोद्वाहस्सहानुजः ।
राघवो :निर्ययौ तेन जनकेनोरुमानितः ॥ ३८ ॥
तदाकर्ण्य धनुर्भङ्गमायान्तं रोषभीषणम् ।
विजित्य भार्गवं राममयोध्यां प्राप राघवः ॥ ३९ ॥
ततस्सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः ।
तामध्युवास काकुत्स्थस्सीतया सहितस्सुखम् ॥ ४० ॥

इति श्रीबालकाण्डः समाप्तः ॥ १ ॥

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः ।
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः ॥ १ ॥
ततः प्रकृतिभिस्साकं मन्त्रयित्वा स भूपतिः ।
अभिषेकाय रामस्य समारेभे मुदाऽन्वितः ॥ २ ॥
कैकेयी तु महीपालं मन्थरादूषिताशया ।
वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम् ॥ ३ ॥

वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।
तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः ॥ ४ ॥
रामं तदैव कैकेयी वनवासाय चादिशत् ।
अनुज्ञाप्य गुरून्सर्वान्निर्ययौ च वनाय सः ॥ ५ ॥
दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः ।
संत्यज्य स्वगृहान्सर्वे पौराश्चानुययुर्द्रुतम् ॥ ६ ॥
वञ्चयित्वा कृशान्पौरान्निद्राणान्निशि राघवः ।
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत् ॥ ७ ॥
शृङ्गिबेरपुरं गत्वा गङ्गाकूलेऽथ राघवः ।
गुहेन सत्कृतस्तत्र निशामेकामुवास च ॥ ८ ॥
सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः ।
गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥ ९ ॥
भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः ।
राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत्सुखम् ॥ १० ॥
अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः ।
राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम् ॥ ११ ॥

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः ।
राम रामेति विलपन्देहं त्यक्त्वा दिवं ययौ ॥ १२ ॥

मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः ।
दूतैस्तमानयामासुर्भरतं मातुलालयात् ॥ १३ ॥

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।
संस्कारादि चकाराऽस्य यथाविधि सहानुजः ॥ १४ ॥

अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा ।
वनायैव ययौ राममानेतुं नागरैस्सह ॥ १५ ॥

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।
ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैस्सह ॥ १६ ॥

चतुर्दश समा नीत्वा पुनरेष्याम्यहं पुरीम् ।
इत्युक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत् ॥ १७ ॥

गृहीत्वा पादुके तस्माद्भरतो दीनमानसः ।
नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥ १८ ॥

राघवस्तु गिरेस्तस्माद्गत्वाऽत्रिं समवन्दत ।
तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत् ॥ १९ ॥

उषित्वा तु निशामेकामाश्रमे तस्य राघवः ।
विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥ २० ॥

इत्ययोध्याकाण्डः समाप्तः ॥ २ ॥

व्रजन्वनेन काकुत्स्थो विराधं विधिचोदितम् ।
सदारानुजमात्मानं हरन्तमवधीत्तदा ॥ १ ॥
शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः ।
प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥ २ ॥
तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः ।
अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥ ३ ॥
रामाय वैष्णवं चापमैन्द्रं तूणीयुगं तथा ।
ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसंभवः ॥ ४ ॥
ततस्स गच्छन्काकुत्स्थः समागम्य जटायुषम् ।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥ ५ ॥
ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् ।
पर्णशालामध्युवास सीतया सहितस्सुखम् ॥ ६ ॥
तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका ।
तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥ ७ ॥

राममेव ततो वव्रे कामार्ता कामसन्निभम् ।
पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥ ८ ॥
लक्ष्मणेन तदा रोषात्कृत्तश्रवणनासिका ।
सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥ ९ ॥
तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ ।
दूषणत्रिशिरोमुख्यैर्यातुधानैस्समन्वितः ॥ १० ॥
तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः
खरं सहानुगं संख्ये जघान लघुविक्रमः ॥ ११ ॥
ततश्शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।
न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥ १२ ॥
तच्छ्रुत्वा रावणस्सीतां हर्तुं कृतमतिस्तदा ।
मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत् ॥ १३ ॥
सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत् ।
सा तु तं मृगमाहर्तुं भर्तारं समयाचत ॥ १४ ॥
नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः ।
अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे ॥ १५ ॥

विव्याध च मृगं रामः स निजं रूपमास्थितः ।
हा सीते लक्ष्मणेत्येवं रुदन्प्राणान्समत्यजत् ॥ १६ ॥

एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम् ।
तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम् ॥ १७ ॥

तदन्तरं समासाद्य रावणो यतिरूपधृत् ।
सीतां गृहीत्वा प्रययौ गगनेन मुदान्वितः ॥ १८ ॥

ततो जटायुरालोक्य नीयमानां तु जानकीम् ।
प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम् ॥ १९ ॥

छित्वैनं चन्द्रहासेन पातयित्वा च भूतले ।
गृहीत्वा रावणस्सीतां प्राविशन्निजमन्दिरम् ॥ २० ॥

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।
रावणो रक्षितुं चैनां नियुयोज निशाचरीः ॥ २१ ॥

हत्वा रामस्तु मारीचमागच्छन्ननुजेरिताम् ।
वार्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत् ॥ २२ ॥

अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे ।
सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः ॥ २३ ॥

तेनोक्तां जानकीवार्तां श्रुत्वा पश्चान्मृतं च तम् ।
दग्ध्वा सहानुजो रामश्चक्रे तस्योदकक्रियाम् ॥ २४ ॥
आत्मनोऽभिभवं पश्चात्कुर्वतीं पथि लक्ष्मणः ।
अयोमुखीं चकाराशु कृत्तश्रवणनासिकाम् ॥ २५ ॥
गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् ।
ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ ॥ २६ ॥
स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये ।
सुग्रीवमृश्यमूकस्थं याहीत्युक्त्वा दिवं ययौ ॥ २७ ॥
ततः प्रीतो रघुश्रेष्ठश्शबर्याश्रममभ्ययात् ।
तयाऽभिपूजितः पश्चात्पम्पां प्राप सलक्ष्मणः ॥ २८ ॥

इत्यारण्यकाण्डः समाप्तः ।

हनूमानथ सुग्रीवनिर्दिष्टौ रामलक्ष्मणौ ।
प्राप्य श्रुत्वा तु वृत्तान्तं तेन तौ समयोजयत् ॥ १ ॥
ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः ।
सख्यं च कारयामास तयोः पावकसन्निधौ ॥ २ ॥
प्रतिजज्ञे तदा रामो वधिष्यामीति वालिनम् ।
दर्शयिष्यामि वैदेहीमित्यन्येन च संश्रुतम् ॥ ३ ॥

सुग्रीवेणाथ रामाय भ्रातृवैरस्य कारणम् ।
निवेदितमशेषं च बलाधिक्यं च तस्य तत् ॥ ४ ॥

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् ।
सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः ॥ ५ ॥

पुनश्च दर्शितांस्तेन सालान्सप्त रघूत्तमः ।
बाणेनैकेन चिच्छेद सार्धं तस्यानुशङ्कया ॥ ६ ॥

किष्किन्धां प्राप्य सुग्रीवस्ततोरामसमन्वितः ।
जगर्जातीव संतुष्टः कोपयन्वानराधिपम् ॥ ७ ॥

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयद्भृशम् ।
सोऽपि सम्भग्नसर्वाङ्गः प्राद्रवद्राघवान्तिकम् ॥ ८ ॥

कृतचिह्नस्तु रामेण पुनरेव स वालिनम् ।
रणायायाथाह्वयत्क्षिप्रं तस्थौ रामस्तिरोहितः ॥ ९ ॥

हेममाली ततो वाली तारयाऽभिहितं हितम् ।
निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम् ॥ १० ॥

बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत् ।
सोऽपि राम इति ज्ञात्वा देहं त्यक्त्वा दिवं ययौ ॥ ११ ॥

पश्चात्तपन्तं सुग्रीवं समाश्वास्य रघूत्तमः ।
वानराणामधिपतिं चकाराश्रितवत्सलः ॥ १२ ॥
ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः ।
उवास चतुरो मासान्सीताविरहदुःखितः ॥ १३ ॥
अथ रामस्य निर्देशाल्लक्ष्मणो वानराधिपम् ।
आनयत्प्लवगैस्सार्धं हनुमत्प्रमुखैर्गिरिम् ॥ १४ ॥
सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरान् ।
न्ययुङ्क्त सीतामन्वेष्टुमाशासु चतसृष्वपि ॥ १५ ॥
ततो हनुमतः पाणौ ददौ रामोऽङ्गुलीयकम् ।
विश्वासाय तु वैदेह्यास्तद्गृहीत्वा स निर्ययौ ॥ १६ ॥
ततो हनूमत्प्रमुखा वानरा दक्षिणां दिशम् ।
गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन् ॥ १७ ॥
समयातिक्रमात्तत्र चक्रुः प्रायोपवेशनम् ।
तेऽत्र संपातिना प्रोक्तां सीतावार्तां च शुश्रुवुः ॥ १८ ॥
ततः प्रापुरुदन्वन्तमङ्गदाद्याः प्लवङ्गमाः ।
तं विलङ्घयितुं तेषां न कश्चिदभवत्क्षमः ॥ १९ ॥

स्वप्रभावप्रशंसाभिस्तदा जाम्बवदुक्तिभिः ।
संवर्धितो महेन्द्राद्रिमारुरोहानिलात्मजः ॥ २० ॥

इति किष्किन्धाकाण्डः समाप्तः ।

अभिवाद्याथ सकलानमरान्पवनात्मजः ।
पुप्लुवे च गिरेस्तस्माद्विलङ्घयितुमर्णवम् ॥ १ ॥
स समुल्लङ्घ्य मैनाकं सुरसामभिवाद्य च ।
निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः ॥ २ ॥
लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।
सीतां विचिन्वन्नद्राक्षीन्निद्राणं निशि रावणम् ॥ ३ ॥
अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः ॥ ४ ॥
पादपं कश्चिदारुह्य तत्पलाशैस्सुसंवृतः ।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥ ५ ॥
रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः ।
भार्या भव ममेत्येवं बहुधा समयाचत ॥ ६ ॥
अहं त्वदनुगा न स्यामित्येषा तं निराकरोत् ।
काममन्युपरीतात्मा रावणोऽथ गृहं ययौ ॥ ७ ॥

गते तु रावणे सीतां प्रलपन्तीं स मारुतिः ।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥ ८ ॥
तत्समादाय वैदेही विलप्य च भृशं पुनः ।
चूडामणिं ददौ तस्य करे सा मारुतेः प्रियम् ॥ ९ ॥
मा विषादं कृथा देवि राघवो रावणं रणे ।
हत्वा त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ ॥ १० ॥
नीतिमान्सोऽपि संचिन्त्य बभञ्जोपवनं च तत् ।
अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥ ११ ॥
ततश्शक्रजिता युद्धे बद्धः पवननन्दनः ।
प्रतापं रघुनाथस्य रावणाय न्यवेदयत् ॥ १२ ॥
रक्षोदीपितलाङ्गूलस्स तु लङ्कामशेषतः ।
दग्ध्वा सागरमुत्तीर्य वानरान्समुपागमत् ॥ १३ ॥
स गत्वा वानरैस्साकं राघवायात्मना कृतम् ।
निवेदयित्वा सकलं ददौ चूडामणिं च तम् ॥ १४ ॥

इति सुन्दरकाण्डः समाप्तः ।

अथासंख्यैः कपिगणैस्सुग्रीवप्रमुखैस्सह ।
निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधेः ॥ १ ॥

तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत् ।
लङ्काधिपत्येऽभ्यषिञ्चदेनं रामोऽरिमर्दनः ॥ २ ॥
उक्तमार्गस्समुद्रेण तत्र सेतुं नलेन सः ।
कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम् ॥ ३ ॥
ततो राघवनिर्दिष्टा नीलमुख्याः प्लवङ्गमाः ।
रुरुधुस्सर्वतो लङ्कां वृक्षपाषाणपाणयः ॥ ४ ॥
रावणस्य नियोगेन निर्गतान्युधि राक्षसान् ।
प्रहस्तप्रमुखान्हत्वा नेदुस्ते सिंहविक्रमाः ॥ ५ ॥
सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ ।
राक्षसान्सुबहून्युद्धे जघ्नुर्भीमपराक्रमाः ॥ ६ ॥
रावणिस्तु ततोऽभ्येत्य समरे रामलक्ष्मणौ ।
ननाह नागपाशेन नागारिस्तौ व्यमोचयत् ॥ ७ ॥
रावणोऽपि ततो युद्धे राघवेण पराजितः ।
कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च ॥ ८ ॥
ततो वानरसङ्घांश्च भक्षयन्तं निशाचरम् ।
ऐन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम् ॥ ९ ॥

ततो रावणसंदिष्टौ देवान्तकनरान्तकौ ।
हनूमदङ्गदाभ्यां तु निहतौ रणमूर्धनि ॥ १० ॥

अथातिकायमायान्तं रथमारुह्य वाहिनीम् ।
अर्दयन्तं महाकायं लक्ष्मणश्चावधीच्छरैः ॥ ११ ॥

ततो रावणसंदिष्टश्शक्रजिद्राघवौ रणे ।
ब्रह्मास्त्रेण च तौ बद्ध्वा वानरांश्चावधीच्छरैः ॥ १२ ॥

अथ जाम्बवतो वाक्याद्गत्वा चौषधिपर्वतम् ।
मारुतिश्चौषधीस्तत्राद्दष्ट्वा कोपं चकार सः ॥ १३ ॥

भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः ।
तासां गन्धेन वै सर्वान्राघवादीनजीवयत् ॥ १४ ॥

रावणः कपिभिर्दग्धां पुरीं वीक्ष्य रुषान्वितः ।
न्ययुङ्क्त कुम्भकर्णस्य पुत्रौ हन्तुं च राघवौ ॥ १५ ॥

अथार्दयन्तौ तत्सैन्यं वीक्ष्य तौ बलशालिनौ ।
कुम्भं रामोऽवधीद्बाणैर्निकुम्भं चात्मजो रवेः ॥ १६ ॥

ततः खरात्मज तेन रावणेन प्रचोदितम् ।
पीडयन्तं कपीन्बाणैर्जघानास्त्रेण राघवः ॥ १७ ॥

ततस्संतप्तहृदयो रावणो युद्धदुर्मदम् ।
प्रचोदयामास सुतं युद्धे हन्तुं स राघवौ ॥ १८ ॥

नगरान्निर्ययौ तूर्णमिन्द्रजित्समितिंजयः ।
मायासीतां विनिक्षिप्य सर्वेषां मोहनाय वै ॥ १९ ॥

वानरेष्वपि पश्यत्सु हनूमत्प्रमुखेषु च ।
जघान सीतां खड्गेन शितेन समितिंजयः ॥ २० ॥

युद्धं त्यक्त्वा ततस्सर्वैर्वानरैस्संपरीवृतः ।
दुःखितो हनुमांस्तत्र यत्र रामोऽव्रजल्लघु ॥२१ ॥

उपागम्याब्रवीद्रामं हनूमान्निखिलं तदा ।
श्रुत्वा वृत्तान्तमखिलं रामो मोहमवाप सः ॥ २२ ॥

विभीषणोऽथ संप्राप्य दृष्ट्वा रामं च मूर्छितम् ।
विषण्णान्वानरान्वाचा सान्त्वयन्निदमब्रवीत् ॥ २३ ॥

मिथ्या विषादं संत्यज्य जगन्नायक हे प्रभो ।
शृणुमेऽभिहितं वाक्यं ज्ञात्वा रावणिमानसम् ॥ २४ ॥

दुरात्मना कृता माया राक्षसेन्द्रसुतेन वै ।
निकुम्भिलायां होमं तु कर्तुं तेनाधुना किल ॥ २५ ॥

लक्ष्मणं प्रेषयाद्यैव मया सह समन्त्रिणा ।
कृते होमे तत्र रिपुरजेयो भवति ध्रुवम् ॥ २६ ॥

उवाच रामस्सौमित्रिं राक्षसेन्द्रसुतं जहि ।
गच्छेति शीघ्रं सुहृदा रावणस्यानुजेन सह ॥ २७ ॥

लक्ष्मणस्तु तदा राममामन्त्र्य सविभीषणः ।
निकुम्भिलां प्राप तूर्णमिन्द्रजिद्यत्र वर्तते ॥ २८ ॥

अदर्शयद्भ्रातृपुत्रं धर्मात्मा स विभीषणः ।
लक्ष्मणो भेदयामास राक्षसाञ्छरसंचयैः ॥ २९ ॥

कृत्वा चिरं तत्र युद्धमैन्द्रेणास्त्रेण वै रुषा ।
शिरश्चिच्छेद सौमित्रिर्दशाननसुतस्य हि ॥ ३० ॥

स सुतस्य वधं श्रुत्वा रावणश्शोककर्शितः ।
नष्टधैर्यो विह्वलाङ्गो विललापाकुलेन्द्रियः ॥ ३१ ॥

निरर्थकं तु मज्जन्म जल्पितं च निरर्थकम् ।
येनाहमद्य पश्यामि हतमिन्द्रजितं रणे ॥ ३२ ॥

क्व गतोऽसि हतश्शूर ! मानुषेण पदातिना ।
राज्याद्भ्रष्टेन दीनेन त्यक्त्वा मां पुत्र ! जीवितम् ॥ ३३ ॥

इन्द्रं जित्वा तु तं बद्ध्वा लङ्कामानीय वै बलात् ।
अकरोस्त्वं प्रतापेन कारागृहनिवासिनम् ॥ ३४ ॥

मोचयामास ब्रह्मा त्वां सान्त्वयित्वाऽमराधिपम् ।
तादृक्त्वं पुत्र ! मां त्यक्त्वा गतोऽद्य सुदुरासदः ॥ ३५ ॥

किं करिष्याम्यहं पुत्र ! क्व गच्छामि वदाऽधुना ।
नय मां यत्र गन्ताऽसि तत्र ते न विलम्बनम् ॥ ३६ ॥

लोकेषु त्वत्समो नास्ति तादृशस्य पितुर्मम ।
इत्याशया स्थितं पुत्र गर्वितेन मयाऽत्र हि ॥ ३७ ॥

धूम्राक्षो वज्रदंष्ट्रश्च कुम्भकर्णः प्रतापवान् ।
राक्षसा निहतास्सर्वे प्रहस्तप्रमुखा अपि ॥ ३८ ॥

अनादृत्य तु तान्सर्वान्राक्षसान्प्रहतानपि ।
अवष्टभ्य बलं पुत्र सुखेनावस्थितं तव ॥ ३९ ॥

इत्येवं बहुधा तत्र विलप्य स तु रावणः ।
अन्तर्नियम्य दुःखानि कोपं चक्रे सुदारुणम् ॥ ४० ॥

रथं सूत ! ममाग्रे त्वं क्षिप्रं कुरु जयैषिणः ।
रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं गृहात् ॥ ४१ ॥

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम् ।
रामेण सह संगम्य युद्धं चक्रे सुदारुणम् ॥ ४२ ॥

ततो मातलिनाऽऽनीतं रथमैन्द्रं समारुहन् ।
रराज रामो धर्मात्मा ह्युदयस्थो यथा रविः ॥ ४३ ॥

चकार युद्धं तुमुलं देवबृन्दे च पश्यति ।
सीताहरणजात्कोपाद्रामो धर्मभृतां वरः ॥ ४४ ॥

अथागस्त्यस्य वचनाद्रावणं लोककण्टकम् ।
जघान रामो लक्ष्मीवान्ब्राह्मेणास्त्रेण तं रणे ॥ ४५ ॥

मन्दोदरी वधं श्रुत्वा भर्तुः प्रियतरस्य सा ।
विललाप रणं गत्वा कुररीव भृशातुरा ॥ ४६ ॥

विभीषणोऽथ रामेण संदिष्टः सह राक्षसैः ।
चकार दहनं तस्य रावणस्य गतायुषः ॥ ४७ ॥

अथाग्निवचनात्सीतां रामो वीक्ष्य सुनिर्मलाम् ।
संदिष्टो देवबृन्दैश्च जग्राह पितृसंनिधौ ॥ ४८ ॥

तवैव युक्तं कर्मैतत्सर्वलोकभयंकरम् ।
यद्वैदेह्याः कृते राम! सा तु लक्ष्मीर्भवान्स्वभूः ॥ ४९ ॥

इत्येवं देवसंघैश्च मुनिभिश्चाभिपूजितः ।
लक्ष्मणश्च तुतोषाथ रामो विश्वासमाययौ ॥ ५० ॥

विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः ।
कारयामास लक्ष्मीवाननुजेनाभिषेचनम् ॥ ५१ ॥

ततः पुष्पकमारुह्य सह मित्रैर्जगत्पतिः ।
भार्यानुजाभ्यां सहितः किष्किन्धां प्राप राघवः ॥ ५२ ॥

किष्किन्धानिलयास्सर्वाः कपीनां योषितः प्रियाः ।
सीताकुतूहलात्पुष्पं विमानं तास्समारुहन् ॥ ५३ ॥

अथ दाशरथिः श्रीमान्भरतं द्रष्टुमिच्छया ।
भरद्वाजाश्रमं प्राप्तस्तत्र तेन निमन्त्रितः ॥ ५४ ॥

भरतस्यान्तिकं रामः प्रेषयामास मारुतिम् ।
रामस्यादर्शनाद्वह्निप्रवेशं काङ्क्षतो भृशम् ॥ ५५ ॥

तत्र तेन मुनीन्द्रेण सानुजस्ससुहृद्गणः ।
संतोषविवशेनाथ रामोऽपि विधिपूजितः ॥ ५६ ॥

रामोऽथ सह संगम्य भरतेनारिघातिना ।
अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिनन्दितः ॥ ५७ ॥

अथायोध्यानिवासास्ते जनास्सर्वेऽपि तोषिताः ।
अभिगम्याब्रुवन्रामं धन्या वयमिति द्रुतम् ॥ ५८ ॥

चातकस्तु घनान्दृष्ट्वा मयूराश्च यथा शिशून् ।
आसाद्य मातरस्तेषां तथा प्रापुर्जना मुदम् ॥ ५९ ॥

अथाभिषेकं रामस्य वसिष्ठाद्या मुदाऽन्विताः ।
सहिता मन्त्रिभिश्चक्रुर्वसवो वासवं यथा ॥ ६० ॥

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः ।
यथार्हं पूजिताश्चासन्स्रग्गन्धाम्बरभूषणैः ॥ ६१ ॥

विशिष्य मुक्ताहारेण सीतया हनुमान्मुदम् ।
पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ६२ ॥

सर्वासां वानरीणां च कौसल्या पुत्रवत्सला ।
भूषणैर्भूषयामास वस्त्रचन्दनकुंकुमैः ॥ ६३ ॥

रामाज्ञयाऽथ सर्वेऽपि सुग्रीवादिप्लवङ्गमाः ।
किष्किन्धां लेभिरे कृच्छ्राच्छ्रीरामविरहातुराः ॥ ६४ ॥

अतिभक्तो दीर्घजीवो लङ्कासमरसाधकः ।
अनुज्ञातस्स रामेण लङ्कां प्रायाद्विभीषणः ॥ ६५ ॥

पितुस्सिंहासनं प्राप्य भ्रातृभिस्सहितोऽनघः ।
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ॥ ६६ ॥
लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् ।
भरतायाप्रमेयाय प्राणात्प्रियतराय सः ॥ ६७ ॥
चत्वारस्ते महात्मानस्सभार्या रघुसत्तमाः ।
खे सतारो यथा चन्द्रस्तथा रेजुस्स्वपत्तने ॥ ६८ ॥

इति युद्धकाण्डः समाप्तः ॥ ६ ॥

इति श्रीरामोदन्तस्समाप्तः ॥

॥ समाप्तश्चायं प्रथमः पाठः ॥

शुभं भूयादध्येतुरध्यापकस्य च ॥